अलका-मिलनम्

एम० ए० काव्यतीर्थेत्युपाधिधारिणाऽध्यापकेन
श्रीमद्-द्विजेन्द्रलाल-शर्म-पुरकायस्थेन
विरचितम्

जयपुरतः

मूल्यम्
सपादम् एकरुप्यकम्
(१.२५ रु०)

प्राप्ति स्थानम्—
डी० ११७, बापू नगर, जयपुर–४
(राजस्थान)

द्वितीयं संस्करणं १९७३

मुद्रक
ऐलोरा प्रिण्टर्स,
जयपुर-३

निवेदनम्

प्रथम-संस्करणस्य

महाकवेः कालिदासस्य पदाङ्कानुसरणाय मन्दबुद्धिः स्वल्पशक्तिरपि महतीम् आकांक्षामनुसन्दधानोऽहं गुरुभ्यः सज्जनेभ्यश्च सबलं प्रेरणं प्रोत्साहनञ्च सहायमात्रमिति गृहीत्वाऽस्मिन् दुःसाध्ये कर्मणि ससंकोचमेव प्रवर्त्ते। मदीयेयं स्पर्द्धा साधुभिः स्वभावकृपालुभिः क्षन्तव्या स्यात्, यदहं "चापलाय प्रणोदितः" सन् इदं दुष्करं कर्म कथमपि साधयितुं समाचेष्टे न तु पुनः "कवियशः" प्रार्थनयेति। "सदसद्व्यक्तिहेतवो" विद्वांसः पाठका एवात्र प्रमाणम्। काव्यकृतौ प्रथमेयं मे चेष्टा, अतः क्वचिदस्मिन् ग्रन्थे भ्रान्तिदोषा अपि स्युः। सहृदयाः पाठका शुभबुद्ध्यैव यथाऽवसरं तद् विज्ञापनेनाऽनुगृह्णन्तु मां तथा च ते सर्वथा कृतज्ञताभाजनं मे भवन्तु।

मेघदौत्यादनन्तरमलकायां विरहार्त्तस्य यक्षस्य तथाविधया स्वपत्न्या यक्षिण्या च पुनर्मिलनम् एवास्य खण्डकाव्यस्य विषयः। अत्र चापि द्वावेव सर्गौ स्तः। प्रथमे सर्गे यक्षिण्या विरहावशेषः संक्षेपेन प्रकटीकृत स्तथास्यैवान्त्ये श्लोके यक्षसमागमोऽपि विधीयते। अन्त्ये सर्गे उभयोर्मिलनोल्लासो वर्ण्यते तथाप्यहं तर्कयामि क्षुद्रमपि पुस्तकमिदं

सज्जनैः सत्कर्मोत्साहिभिः पाठकैरादृतं भवेदिति । सहृदयास्त एवात्र प्रमाणम् ।

अस्मिन्नवसरे ये गुरवो-ऽध्यापकाः डॉ० सुशीलकुमार-दे-प्रबोधचन्द्र-लाहिडी-श्रीज्ञानेश्वरशास्त्रीत्यादयः सदुपदेशै मां काव्यामोदिनमकुर्वन्, ये च सहृदयाः सखायो मे सदैवोत्साहमददु स्तान् सर्वान् प्रति बहुशः कृतज्ञोऽहम् । शिष्यवर-श्रीमूलचन्द्रपाठकस्यापि पाठलेखनेऽत्र सहायताऽस्ति । अलमति-विस्तरेण ।

विनीतस्य

जयपुरम् १९५४ खृ० — ग्रन्थकारस्य

द्वितीय-संस्करणेऽद्य काव्यमिदं कथंचित् परिवर्तितं यथासम्भवं संस्कृतं च विधाय प्रकाशितम् । श्रीमन्तो जगदीशाचार्य-स्वामि-सूरजनदास—डा० पी० एल० भार्गव—डा० सुधीर-गुप्त-प्रभृतयः सहृदयाश्चात्र सामयिकैः परामर्शादिभि र्मामनुगृहीतवन्त इति सादरं स्वीकृतम् ।

आगस्तस्य विनीतस्य

त्रयोदशेऽहनि (रक्षाबन्धन-पूर्णिमायां), १९७३ खृ०, ग्रन्थकारस्य

जयपुरतः ।

उत्सर्ग-पत्रम्

प्रियायै प्रीतिदायै मे प्रेमप्राणं पतिश्रितम् ।
अलका-मिलनं 'शान्त्यै' मयोत्सर्गीकृतं मुदे ।।

ग्रन्थकारेण

* मङ्गलाचरणम् *

नमामि विघ्ननाशाय गणेशं शंकरीं शिवम् ।
शुभसाफल्यभाग्यार्थं श्रियं वाणीं च माधवम् ।।

धिये नमो गुरुभ्योऽस्तु श्रद्धामात्रधनस्य मे ।
भक्तिसंपज्जयानन्द—श्री-शांति-शक्ति-सिद्धये ।।

हरिदासाश्रिते धेहि सुशीलत्वं नयप्रभाम् ।
जीवनजयबोधेभ्यः सत्यज्ञानप्रफुल्लताम् ।।

स्वर्गतौ स्नेहसर्वस्वौ पार्थिवजन्मकारणम् ।
नमामि पितरौ भक्त्या 'दुलालाऽऽनंद'-मूर्त्तिकौ ।।

वाण्याः प्रेष्ठं सुतमतुलितं मिष्टभाषं रसाब्धिं
काव्यामर्त्यं भुवनविदितं मेघदूतं सृजन्तम् ।
विद्वत्सेव्यं कविकुलपतिं कालिदासं प्रणौमि
तत्पादांकानुसृतिविषये सम्मतिं सिद्धिमिच्छुः ।।

अलका-मिलनम्

आद्यः सर्गः

(विरहावशेषः)

मेघात् प्राप्य श्रुतिसुखकरं प्रागभिज्ञानयुक्तं
सन्देशं तद्-विरहितपतेर्दीर्घमाप्रेक्ष्यमाणम् ।
सा यक्षस्त्री स्मितसुदशनोत्साहदृप्ताऽद्यशीर्णा-
प्याशीर्वादं विकसितदृशोरुत्ससर्जाऽश्रु-धाराम् ॥१॥

पत्युः संगात् सुचिरमधुना वञ्चितायां हि तस्यां
तिष्ठान्नासीत् कथमनुदिनं निर्दयः प्राणवायुः ।
तत्सन्देशामृतमुपगता सापि संजीवितेव
भाग्यन्त्वाशाश्रितसुविधुरा मेन आश्वार्तिहारि ॥२॥

भूशय्याया नयनसलिल-प्लाविताया उदित्य
सुस्नेहात्तज्जलमुचममुं स्वागतं ज्ञापयन्त्याः ।
क्षीणास्यश्री-रवधिरहिताऽगेऽथ तस्तार सद्यश्-
चित्तग्लानेः कथमपि शमः कान्तिपुष्ट्योस्तु मूलम् ॥३॥

"भुञ्जानस्त्वं बहुरतिसुखं जीवितञ्चातिदीर्घं
भूयो भ्राम्यन्नरुचिमनु च्छेदशून्यं विहारम् ।
आशास्थानं त्वमसि सततं योषितां प्रेक्षणीयः
सौदामिन्या चिरमनुभव प्रेमपूर्णं हि योगम् ॥४॥

स्वर्णा-'म्भोजप्रसवि सलिलं' मानसस्योपगृह्य
लीलालास्यप्रणयचरितं प्रीतिदं ते यथेच्छम् ।
कैलासे त्वं सुचर सुचिरं देवरैषा बभाषे
पत्युर्दू ते भवति कृपणा तद्विधा का वियुक्ता ॥५॥

सा साध्वीयं विरहदमिता मेघवार्त्ताप्तशक्ति-
रद्यौत्सुक्यादचिरमिलनं स्वागतं मन्यमाना ।
भूयो भूयो दिवसगणनां भ्रान्तियुक्ता चिचेष्टे
का वार्त्तेवं विचलनकृतौ स्त्रीषु वै स्यादिहान्या ॥६॥

कञ्चित् कालं स्ववशरहिता दृष्टिपातं चकार
यत्रैवेयं प्रभुमयतया तत्र चिन्हं बभासे ।
स्वामिस्पर्शप्रणयसुदृढाबन्धनानामशेषं
नान्यत् प्रेमाञ्जननयनयोरग्रतो दृश्यते किम् ॥७॥

कक्षे भर्त्तुः प्रतिकृतिमियं पादुकाञ्चानुपूज्य
प्रीते वृद्ध्या तदुपरि चिरं भूयसा सन्निबद्धा ।
सन्तप्तानां प्रवरशरणं सान्त्वनायै भवेत्तद्
यद्यप्येते नयनकमले बाधिते नाऽश्रुपातैः ॥८॥

लीलाशालां ललितगमना संप्रवेष्टुं सचेष्टा
द्वारोपान्ते कनकरचितं नूपुरञ्चिद् ददर्श ।
स्वामित्यक्तं किल करुणया तद् गृहीत्वा कराभ्यां
शीर्षे कृत्वा धृतपतिरजः श्लिष्यति स्मोरसा सा ॥९॥

तच्चाञ्चल्ये ह्यथ कथमपि व्याहते धैर्यभाराद्
औत्सुक्यं सत् परममधुना मानसे धारयन्ती ।
प्रेमाविष्टा मदगजगतिः सा गृहन्तद् विवेश
दीर्घं कालं विलसनपदं कान्तविच्छेदरुद्धम् ॥१०॥

प्राणारामम्मिलितमधुरं स्वामीहीनं विमूढं
मालिन्येनाऽऽवृतमथ भृशं शून्यता-सम्पदद्य ।
चित्रं शिल्पं सुललितकलाऽऽलम्बनं यद्विशेषं
शोभाहीनं विकृतमपितत् संबभौ शोकपात्रम् ॥११॥

तत् सर्वं यत् प्रणयविभवस्नर्शभाग्यञ्च काम्यं
दास्यं पत्यु र्मिलनसमये धारयत् सार्थकं च ।
विच्छेदे वै तमसि पतितं व्यर्थतापूरितं सत्
क्लेशं तस्यां नृषु च करूणां वधयामास भूयः ॥१२॥

वीणां धृत्वा कुसुमसदृशं कान्तिमन्तं सुशीर्णं
हस्तं तस्यामधिगतकलावादनार्थं ररक्ष ।
नाऽऽयाताऽऽसीद् हृदि विरहिते रागिणी सुप्रयासैः
सिक्ता तन्त्री विषमविभवा केवलं संरुराव ॥१३॥

'भोः कष्टं मे कृपणविधिना स्त्रीसुखासूयताया'
इत्यालोच्य श्वसितविनता मानसे संजजल्प ।
'रे वीणे किं सकरुणतया भावसाम्यञ्च धृत्वा
विच्छिन्नायै प्रियसखिसमा सान्त्वनां मे ददासि? ॥१४॥

पूर्णश्चन्द्रः पिकमधुरवः संगमः प्रेमिकानां
पुष्पं भूषा सुरभिसरसं माधवो मारुतोऽपि ।
यन्मे रम्यं मदनसुखदं कान्तयोगे प्रभूतं
तद्विच्छेदे सकलमपि तन् मन्यते तापकारि ॥१५॥

यद् वै स्थानं बहुरतियुतं नन्दयन्मां सकामां
कान्तं हित्वा तदपि भवति क्लेशभारस्य हेतुः ।
सौंदर्यं चित्तदपि हितता-दुःखसौख्याकरत्वम्
अन्यायत्तं नहि तु विषयस्यात्मधर्मः क्व च स्यात् ॥१६॥

दूरं याताः सुखितदिवसाः स्वामिसंगेन भोगा-
स्तेषामाविर्भवनमधुनाप्यागतं नेति कष्टम् ।
वित्तेशानामनपरवयो यौवनं सन्न भुक्तं
वैयर्थ्यं मे विहतसुरते दुःखबृद्ध्यै तु याति ॥१७॥

राज्यं भोगान् गृहसुखचयान् वर्ज्जयित्वा सनाथा
सीतोवासाऽऽश्रमवसतिषु क्लेशराशीनुपेक्ष्य ।
दुःखायन्ते मम खलु मुदोऽलौकिकाश्चापि सर्वाः
पत्युः संगो हि सकलसुखं विप्रलम्भस्तु दुःखम् ॥१८॥

किं प्रासादै र्विरहविधुरैर्वन्दिवासैरिवैव
नारीत्वेनाऽविकलवयसा किं पुनर्मे श्रियाऽपि ।
किंवा भोगैस्तरूणवपुषा जीवनेनेन्द्रियैर्मे
सम्पद्भि र्वा मम किमधुना जीवितायास्तथापि ॥१९॥

नाहं जाने किमपि सुखदं दुःखपूर्णे भवेऽस्मिन्
मत्सत्ताया भुवि किमथवा स्यात् पुनस्त्वर्थवत्त्वम् ।
आशामात्राश्रितविरहिणीं यत्नलेशच्युतोऽपि
त्वेकान्तां मां त्यजति न कथं निर्हृतां देहभारः? ॥२०॥

बद्धप्रेम—स्वपतिमिलिताऽऽस्वादवत्यास्तु भूयो
नास्त्येवान्यत् किमपि जगति प्रार्थितं तच्च्युतायाः ।
शून्यावासे विरहदहनात्तार्पितेभ्यः कदापि
स्त्रीलोकेभ्यो न यतिसुलभा रोचते त्वात्मरामः ॥२१॥

पत्नीनिष्ठः प्रणयजलधिः स्वाधिकाराद् वियुक्तो
दूरारण्ये विवसति महानत्र घोरान्धकारः ।
आनन्देभ्यः सुपरिरहितैवालकेयं विशाला
रात्राविन्दू रविरिव दिने भाति भर्त्ता रमण्याम् ॥२२॥

विच्छेदार्त्तं मनसिजशरो मन्मयन्वैकचित्तं
भर्त्तारं मे प्रदहति सदा निर्दयो बन्धुशून्यम् ।
सन्देशोऽयं जलदविहितः स्वामिना प्रेषितो यः
स्वल्प-श्रौतो बहुमतिपदं बाधते मामशेषम् ॥२३॥

मानेनाऽहं परिहृतवती कातरं कान्तकान्तं
पादोपान्ते भुवि च पतितं मां समन्तात् स्तुवन्तम् ।
अद्य स्मृत्या हृदि समुदितं मर्मदाहं दधानं
पश्चात्तापं कथमहमतो दुस्तरं सन्तरामि ? ॥२४॥

मच्चित्तोऽसौ मयि तु निवसन् सर्वतो मत्सुनिष्ठः
स्वातन्त्र्यञ्चित् क्षणमपि सदा कल्पने चाऽसहिष्णुः ।
वर्षव्याप्यं धरति नु कथं दुःसहं विप्रयोगं
चिन्तेयं वै प्रभवति पुनस्त्वात्मदुःखाऽयुतेभ्यः' ॥२५॥

इत्यालोच्योच्छ्वसितहृदया कातरा खेदभारात्
कञ्चित् कालं कमलशयिते मस्तकं स्थापयन्ती ।
चिक्षेपाश्रु प्रवहदमितं साऽन्तरे दह्यमाना
पूर्वं सौख्यं स्मृतिगततया मन्यते दुःखमूलम् ॥२६॥

स्थैर्यप्रान्तं कथमहि पुनः क्लान्तिमत् कान्तमंगं
शोकाघातान्मननविमुखं मानसं धारयन्ती ।
मेने वर्षं विरहसमयं सोत्सुका कल्पकल्पम्
आत्माधीनं त्वनुभवपदं नान्यतन्त्रं विचित्रम् ॥२७॥

तस्मात् कक्षात् बहिरभिमुखी क्लान्तगत्या जगाम
रम्योद्यानं ललितलतिकालब्धगुल्मञ्च लोलम् ।
धारायन्त्रैर्मृदुजललवानुत्सृजद्भिर्विधौतं
स्वामिक्लेशानुसरणवशाद् भूयसा शैत्ययातम् ॥२८॥

कुञ्जे गुञ्जन्मधुकरदलः पुष्पपुञ्जं युयोज
मध्ये मालं मणिमयतलं ग्लानिमानं प्रयातम् ।
आरामेनाऽमितरमणता प्रापिता शोकतोऽपि
शोभावृद्ध्यै किमपि न भवेन्मण्डणं स्वाकृतीनाम्? ॥२९॥

अस्तं याते खलु हि तपने शान्तचित्ता प्रतस्थे
मन्दं मन्दं पदविधरणान्मन्दिरं सोपनीता ।
आलेख्यं तत्-प्रियतमगुरोः स्थापितं वीथिकायां
धूपैर्गन्धैरुपकृतिशतै रेत्य पूजाञ्चकार ॥३०॥

भर्त्तुर्नाम श्रवणसरसं श्रोतुकामा सुगीतं
क्रोडे नीत्वा विहितविधितः सारिकां स्नेहपात्रम् ।
भूयो भूयः सुविनतिपरा वाचयन्ती प्रभूतं
चाञ्चल्यं तद्दमयति बभौ कीर्त्तिणे लीयमाना ॥३१॥

वर्षारात्रिः प्रियविरहिता सुप्तिशून्या सुदीर्घा
क्षीणां तन्वीं पुनरतिशयं कामविद्धां चकार ।
कण्ठाश्लेष-प्रणयितपतौ योषिति स्याद् विकारो
धारापाते प्रगमितपतेः का पुनश्चित्तवृत्तिः ॥३२॥

मेघच्छेदाच्छशधरमुखं प्रेक्ष्य सम्यङ् मनोज्ञं
हर्षोत्फुल्ला नव-कुमुदिनी कान्तियुक्ता सकान्ता ।
अब्जेवात्र प्रणयविमुखा सावृताक्षी बभूव
धातुर्लीला सुदुरधिगमा हेतुरेको बहूनाम् ॥३३॥

साऽविच्छिन्नाद् विरहदहनात्तापिता वर्षभोग्या-
च्छेद सुप्तौ क्षणमपि सतो साग्रहं चेष्टमाना ।
संगं लेभे क्षणमिह न च स्वाप्नमेवापि पत्यु-
र्नैराश्येनाऽनुभवरहिता न 'प्रबुद्धा न सुप्ता' ॥३४॥

सूर्यालोके स्मितकमलिनी गुण्ठमुक्ता विकुण्ठा
मिश्रैर्गीतैर्मुखरविहगाः कामिनो मोदयन्तः ।
आनन्दो वै मनुजमनसि प्रातरेति समृद्धो
विच्छिन्नानां किमपि न परं क्लेशवृद्ध्यै भवेद्वा? ॥३५॥

इत्थं तापाच्चपलितमतिं प्रायशो भ्रान्तियुक्ताम्
आशासूत्रं कथमपि सतीं जीवितां तां बबन्ध ।
आविर्भावः पुनरिति कदा स्वामिनः संविभाव्य
शेषान् मासान् पतिमयतया वाहयन्त्येव तस्थौ ॥३६॥

वर्षान्ते भूः सितजलधरश्रीयुता हैमहैम्यां
दीप्ता शुभ्रा नवकिशलयै र्भूषिता भोगपूर्णा ।
सज्जीभूता प्रणयिमिथुनैश्चालकेयं मयूरै-
र्हृष्टाः सर्वे सुखदशरदि स्वागतायां बभूवुः ॥३७॥

कान्तप्राप्तेः क्षणमिति तदा मानसे सन्दधाना
पुण्यस्नाता शुचिधववृता चञ्चलाक्षी भवन्ती ।
आशामुग्धा चकितपुलका शब्दमात्रैर्बभूव
सोऽयं वेति भ्रमपरतया साग्रहं वीक्षमाणा ॥३८॥

चापल्यं चाप्यसफलमतः क्षीयमाणं लघुत्वा-
न्नैराश्येन प्रबलरभसा दूरितं तत्तु शीघ्रम् ।
दध्रे देहं सपदि जडवल्लक्ष्यहीना मृगाक्षी
स्थाने वाऽस्यामनुभवहृतिः क्लेशशेषो वृथाऽभूत् ॥३९॥

अद्य प्राप्ते सुखविधुनिधिः पूर्णिमा शारदीया
शीतैः शुभ्रैः शमयितुमलं दुःखदाहं मयूखैः ।
शापान्तत्वं सुखमिह पुनश्चादधानाऽऽजगाम
मर्मच्छेदं क्षणमपि शुभं कालयोगे सुखापम् ॥४०॥

मुख्यद्वारे स्वयमथ बभौ निश्चला चित्रितेव
सा बद्धाक्षी पुलकितवपु ध्यानमग्ना वरांगी ।
प्राणाः प्रत्युद्गमनकृतये स्वामिनस्तं समेता-
स्तत्स्पर्शै स्तां पुनरपि सुखै र्जीवितामाविवेशुः ॥४१॥

अलकामिलने काव्ये विरहशेष इत्यथ ।
आद्यः सर्गः समाख्यातो द्विजेन्द्रलाल-शर्मणा ॥१॥

अलका-मिलनम्

अन्त्यः सर्गः

(मिलनोल्लासः)

हर्षोत्फुल्ला पुलकमधुरा स्वामिकण्ठाभिलग्ना
शापान्ते तद्वरमिव पति-प्रेमपूर्णं हि योगम् ।
वव्रे सद्यः स्वपतिविभवा कान्तिमत्याप्तकान्ता
दुःखस्यान्ते सुखसमुदयो मन्यतेऽतीव रम्यः ॥१॥

प्रत्यापन्ने सुखसुसमये स्वामियोगात्तसत्ता
स्वीयं रूपं विजित-मदनं दीप्तिमत् सर्वकाम्यम् ।
आनन्दोत्थं विततमतुलं प्राप भूयः कृशांगी
क्षीराब्धे स्तु प्रमथनफलादुद्धृताऽऽद्या रमेव ॥२॥

दीर्घं कालं पतिपरतया स्वामिरूपात्मसत्त्वां
स्त्रीणामाद्यां जितरतिरमां कोमलांगीं स पश्यन् ।
तामालिंग्याऽनुभवति ततः प्राणतुल्यां स्म कान्ता-
मात्माशेष-प्रणय-सुरसो मूर्तिमापैव वाऽस्याम् ॥३॥

विच्छेदान्ते पुनरुपचयप्राप्तकान्तिं प्रभान्तं
पीयूषेशं शशिनमिव स प्रेमहर्षाश्रुसिक्ताम् ।
मूर्त्तामाशां प्रणयविभवां काम्यसारं गृहीत्वा
भावावेगादधिकचपलो भावयन् तामुवाच ॥४॥

'यस्यै चित्तं चिरमनुदिनं सत्तया मे च याति
यस्याः प्रीतेरभिनवसुखं जीवितोऽहं हि वाञ्छन् ।
चिन्तालक्ष्यं स्मृतिधनमते दुःखकालाश्रयो या
सेयं सम्पत् पुनरुपगता वर्षशेषेण मेऽद्य ॥५॥

मद्विच्छेदे विगतविभवा प्राणशून्येव शीर्णा
संयोगे मे किल पुनरसावाप्तभूतिरनन्या ।
लक्ष्मीरागं नवकमलिनी मुञ्चती धारयन्ती
प्रेमप्राणा रवि-विरहिते तद्गते वा यथा स्यात् ॥६॥

स्वात्मानं याऽनपरशरणं मय्यशेषं समर्प्य
स्वातन्त्र्यं चित् क्षणमपि न वै मानसेऽप्यादधाना ।
प्रेमानन्दा मधुमयवधू र्मन्मयी रागदीप्ता
शान्तिं यायादचपलमतिः केवलं मामुपेता ॥७॥

दृष्ट्वाऽतुल्यामुरसि पुरतो वाष्पमुष्णं क्षिपन्तीम्
आद्यां सृष्टिं सकलसुषमासारमित्येव धातुः ।
स्त्रीरत्नं तां चिरमनुरतामद्य कण्ठे विभृत्य
भाग्यं मन्ये भुवि बहुमतः सन्निधौ मे प्रियायाः ॥८॥

आत्मीयं वै प्रकृतिविहितं स्थानमादाय योग्यं
स्निग्धं रूपं सुखमभिनवञ्चेत्य कान्तस्वभावम् ।
आवामेते प्रणयरसपौ स्वस्तिमत्तां चरेव
दैवं चास्यां विभु भुवि सदा दास इत्येव जीवः ॥९॥

भार्येयं मेऽयुतगुणवती सर्वलोकै वंरेण्या
सौन्दर्येण त्रिभुवनजिताऽसूयिताऽर्हा श्रियाऽपि ।
प्रेमैश्वर्याच्चिरममधुरा सा भवेदङ्गनानां
पातिव्रत्ये शिवपदरताऽनन्यचारिण्युमेव ॥१०॥

कामक्रीडा-विधिसुचतुरा दृष्टितो मोहयन्ती
पादन्यासेऽतनुपथमिवाऽऽलेखयन्त्यङ्गभङ्गान् ।
मेधा मूर्त्ताऽमृतमयगिरा भारतीं लज्जयन्त्य-
पूर्वेयं स्त्री सुरतकुशला सर्वदा सेवनीया ॥११॥

तामेताञ्चाऽसुरसुरनरैः साग्रहं काम्यमानां
वर्षान्तेऽहं पुनरिह सतीमद्य कामं भजामि ।
सौभाग्यं मे दयितमिलनेऽत्येति तत्सीमरेखां
प्राणारामे प्रियपतिमुखं पश्य पश्याऽत्र दासः ॥१२॥

कामार्त्तां मामुरसि निविडं धारयेः कामरूपे
प्रेमस्यन्दोन्मुकुलितदृशा सुस्मिता स्नापयेर्माम् ।
पीयूषं मां तव मुखरसं पाययन्ती पिबेर्मे
प्रीतिस्निग्धं वदसि न कथं मानिनि स्वामिजीवे ॥१३॥

साऽऽनन्दाश्रुप्रवहदमितं व्याकरोत् पद्मनेत्रं
सार्थक्यं तत् पतिमनुरतं प्रेक्षमाणं यदाप ।
शब्दस्पर्शाधिगतमिलनस्वामिनि प्रेमदीप्ते
प्रत्यापन्नेऽनिमिषनयना बद्धदृष्टिं ररक्ष ॥१४॥

जिघ्रन्त्येवाऽनपरसुलभं प्राणमोदं सुगन्धं
कामार्त्ता सत्युपगतपतेरास्यमद्यं पिपासुः ।
तञ्चालिंग्य स्तनयुगमुरो भूयसा पीडयन्ती
प्रत्यङ्गेन प्रियतनुगताऽभिन्नदेहेव तस्थौ ॥१५॥

कञ्चित् कालं दयितमिलिता भावलोके हि तस्थौ
प्रेमावेशात् प्रणयिहृदये कल्पनातश्चरन्ती ।
पीयूषं सा परमिव पपौ प्रेम पत्युः प्रगाढं
कण्ठाश्लेषाधृतपतिमतः प्रीणयन्त्याप्तसंज्ञा ॥१६॥

प्रेमप्राणा प्रियधनयुता सुन्दरीणामनन्या
सम्यक् पीत्वा पतिमुखमधूज्जीविता दीप्यमाना ।
पत्याः शुभ्रे हृदि हि हृदयं मज्जयामास भूयो
विच्छेदाऽन्तेऽधिकमिह भवेत् संगतिः कामभोग्या॥१७॥

स्थानात्तस्मात् कथमपि सती स्वामिवक्षः-सहाया
मन्दं मन्दं पतिपरगति र्नीयते मोदवासे ।
कां वा श्रान्तिं क्षणमतिगतं चाध्वलङ्घेऽपि किञ्चा-
नन्दोत्फुल्ला न हि तु बुबुधेऽनन्यचित्ता तदात्ता ॥१८॥

श्रुत्या प्रेमाऽमृतमयगिरं स्वामिनं पाययन्ती
धीरोदात्तं पतिहृदिगता यक्षिणीतो बभाषे ।
"नायं स्वप्नो न हि तु मम वा भ्रान्तिलेशो न माया
पत्युः संगो धनमतुलितं यात्वशेषत्वमाप्तः ॥१९॥

संगच्छामि प्रियतमसखं मद्गतं मत्प्रसन्नं
वक्षोरत्नं पुनरुपचितं दुःखकालावसानात् ।
धन्याऽहं वै त्वदनुशरणा प्राप्तधर्मार्थकामा
सौभाग्यं मे परममुदितं नन्दयाम्यद्य दिव्यम् ॥२०॥

प्राणाराम त्वमसि खलु मे जीवनं सत्त्वसारः
श्रीमाधुर्यं किमपि यदि वा भूषणं तत्त्वमेव ।
नान्योद्देशं त्वयि मम परं प्रेम लीलायितं वै
त्वत्-संयोगे ध्रुवमनुरता सम्भवाम्यात्मसत्ता ॥२०॥

दिष्ट्या लब्धं समधिकरतिं प्राणकान्तं सुकान्तं
मूर्त्तं प्रेमाऽतनुमपि सदा लज्जयन्तं हृदा त्वाम् ।
सर्वस्वं मे शठ ! वृतवती गौरवं कामिनीनां
प्रेमोत्कर्षादमितसुषमं सार्थकाता भवामि ॥२२॥

सत्यं ब्रूहि प्रिय न कपटं मद्विहीनप्रवासे
विस्मृत्येमां खलु पतिमयोमेककान्तां हि कान्ताम् ।
दीर्घं कालं निनयिथ कथं मां विहायाऽलकायां
दुःखान्न त्वं परमभिभवं किं तथाया यथोऽहम् ? ॥२३॥

पृच्छामि त्वां पुनरपि वदेः किञ्च तत्र त्वमेको
निर्बन्धुः सन्नुवसिथ सदा दुःखभारावसन्नः ।
किंवाऽन्योऽपि प्रियविरहितो व्यर्थकामः सखेव
त्वद्युक्तस्ते सममनुभवन् सान्त्वयन् क्लेशमासीत्? ॥२४॥

किंवा कामं सुसहमकरोदुःसहं मद्वियोगं
सार्द्धं नार्या समहृदयया शान्तया वा कयाचित् ?।
काञ्चिद् वाऽऽप्याऽप्रमितमधुरां कामिनीं कामभोग्यां
भुञ्जान स्त्वं सुखमविहृतं तत्र चासीर्मनोज्ञाम्" ? ॥२५॥

ज्ञात्वाप्यात्मप्रणयसुरतञ्चैकचित्तन्तु चण्डो
तन्निष्ठञ्चाऽनपररमणीसेविनं स्वामिरत्नम् ।
साऽऽस्थाऽप्येषा प्रियमनुगता श्रद्दधानाऽपि तस्मिन्
पप्रच्छैवं, प्रकृतिसरला मानभूषैव नारी ॥२६॥

धीरः शृण्वन्नपि तु कपटं स्वप्रियोक्तं दुरुक्तं
नान्तःसारं कुपितगदितं तत्त्ववेत्तेति जानन् ।
सोऽयं यक्षः किल सकरुणः सादरं तामुरःस्थाम्
अन्तर्यामी सुविदितपतिं मानिनीं प्रत्युवाच ॥२७॥

'जानाष्येव प्रणयनिपुणाऽनन्यचित्ता पतिं ते
नान्योद्देशाप्रतिहतगति-प्रेमलक्ष्यं हि मे त्वम् ।
निष्ठायां मे त्वयि तु हि चिरं तत्त्वमेव प्रमाणम्
अन्तर्दृष्टिं जनयति जने प्रेम शुभ्रं यथार्थम् ॥२८॥

चेष्टां चिन्तामपि तु नियतां त्वामनुप्रेरयन् स्वां
प्रेमाबद्धो दृढमपि सदा सर्वथा निश्चितोऽहम् ।
कः प्रश्नस्ते पुनरिह कुतो विभ्रमः संशयो वा
कान्ते ! कान्ते त्वविरतरतौ स्यात् कथं मानसे ते? ॥२९॥

त्वन्निष्ठैवाऽव्यवहितगतिश्चैकवर्त्माश्रया मे
प्रोते धीरा त्वयि सुनियताऽनन्यलक्ष्या वहन्ती
ऐकाग्र्येणाविचलितमुखी पूतमन्दाकिनीव
शान्तिं गच्छेदतुलचरिते सार्थका त्वामवाप्य ॥३०॥

प्रेमाऽमोघं त्वयि मम परं नित्यशुद्धं त्वनादि
चासामान्यं भवदभिमुखि प्रत्यहं वर्द्धमानम् ।
देव्यासाद्य त्वदनुमिलनं गौरवेतं च सम्यग्
उद्वेलं सद् विरतिरहितं स्यादभंगं ह्यनन्तम् ॥३१॥

त्वय्यात्मा मे मुखरमकरः प्रेमसिन्धावपारे
मज्जन्नेवाऽमितमविरतं राजते भोगरागैः ।
किंवा नित्यं लघुर्गतिरयं सन्तरन् चित्रचारो
भूयोऽप्येवं सुखमभिरतो मोदते हंस एव ।।३२।।

कल्याणी त्वं दृढरतिमते स्त्वद्गले स्त्वत्गते मे
त्वत्प्रीति वैं शिरसि गणिताऽभीष्टरत्नस्वरूपा ।
पत्नीमात्रैकविषयमिह प्रेम विद्धात्यतो मे
सानन्दं तत् प्रतिचर भृशं स्वामिने तेऽद्य मह्यम्।। ३ ३ ।।

किं व्याजेन त्वमयि शृणु मां भाषया घोषयन्तं
प्रेमानन्दे दयितमधुरे जीवनं मेऽसि सत्त्वम् ।
त्वद्विच्छेदे नु कथमभवं प्राणवान् वा न वा सन्
संयोगे ते पतिपररते जातु सञ्जीवितोऽहम् ।।३४।।

एकप्राणौ रतिसुखपरावेकलक्ष्यञ्चरन्ता-
वेकात्मानौ खलु च नितरां भावनाऽभेदवन्तौ ।
अन्योन्यं वै सममनुभवैश्चात्मसेवां दधाना-
वेकोऽप्यावां रुचिमतिकृतै र्देहबन्धात्तु भिन्नौ ।।३५।।

प्रेमैवाऽर्थो मम तु चरमः स्यन्दमानन्त्वबाधं
नित्यं शुभ्रं तव खलु वहृच्चैकनिष्ठं प्रगाढम् ।
यस्माच्छ्रेयः कथमपि न मे कुत्र किञ्चित् कदा च
दीनेऽधीने मयि चिरमतस्तन्महार्घं विधेहि ॥३६॥

कामन्यां स्त्रीं नयनविषये नाऽर्थये स्वप्नतोऽपि
स्वर्लोकं वा न हि तु परमं दिव्यभोगायुतं वा ।
ब्रह्मानन्दं त्वपि न हि प्रियं सेव्यमेवात्र मन्ये
प्रेमामूल्यं त्वदननधि हीप्साम्यपारात् पयोधेः ॥३७॥

नान्यत् काम्यं किमपि तु मया लक्ष्यते चिन्त्यते वा
प्रेम प्रेयो निखिलविषयात्तो त्वखण्डं सजीवम् ।
इत्येवं ते विनतमनसा प्रार्थ्यतेऽद्य प्रकामं
मानं हित्वा चिरमनुगते देवि मेऽतः प्रसीद ॥३८॥

आशापात्रं त्वमसि नितरामेकभक्तेश्चिरं मे
सर्वे कामा अनपरमुखाः केवलं त्वां स्पृशन्तः ।
चिन्ताधारा सममविहता हि स्वतो धावति त्वा-
मैकान्त्येन त्वदनुचरतो मे प्रसन्ना भव त्वम् ॥३९॥

प्रेमाधार त्वमसि महती मूर्तिरेव क्षमाया
आश्वासं मे वितर कृपया हास्यदीप्तैः कटाक्षैः ।
कामार्त्तं माममितकरुणे प्रापयेः स्वं पतिं ते
फुल्लाम्भोजं सर इव परं स्पन्दमानं तु वक्षः ॥४०॥

त्वं मे वीर्यं पुरुषसुलभं नित्यरूपा प्रतिष्ठा
स्वाधिष्ठानं किल परमपि प्रेयसी प्राणवायोः ।
सत्तासारस्त्वमिति खलु मे सर्वथाऽहं त्वदीय
श्चानन्दो मे चिरमयि मयि प्रार्थये त्वं प्रसीद ॥४१॥

किं बाहुल्यैरपि सुचरिते भाषितैर्मे समुच्चै-
रात्मासि त्वं परमशरणं देहमात्रस्य मे वै ।
ज्ञातास्वादस्तव परमतः प्रेमपात्रं भवेयं
संप्रीता चेद् भव मयि सदा सर्वथा सार्थकोऽहम् ॥४२॥

सत्यं जाने प्रियसहचरि त्वं ममाऽहं तवैव
धातुः सृष्टेः प्रथमसमयादद्य चागामिकाले ।
नित्यामोघप्रणयजडितौ सर्वदा मोदमाना-
वेको ह्यावां चिरमयि कदाप्येव नो भिन्नसत्तौ ।४३॥

मानं किंवा परमपि यशो गौरवं वापि धर्मं
देवत्वं वा त्रिभुवनतले नार्थयेऽहं प्रभुत्वम् ।
किं लोकैर्वा शृणु पुनररे कामये नापवर्गं
निर्विच्छेदं प्रणयमतुलं धेहि ते मय्यशेषम् ॥४४॥

आदर्शस्त्री स्वपतिपरमा प्रेममय्यप्यनन्या
शुश्रूषुर्यत् सुविदितमपि स्वामिनो मे चरित्रम् ।
सुस्पष्टं त्वां तदभिहितवान् प्रीतये तेऽहमद्य
वाक्प्राचुर्यं स्तवनमधुरं रोचतेऽतीव नार्यै ॥४५॥

मत्सम्बन्धे परिहर भयं मूलहीनं समस्त-
मैकान्त्येन ध्रुवमपनये मानसे संशयांशम् ।
कापट्यं वा कलितकलहं मुञ्च मानप्रमादं
स्वच्छ-प्रेम्णा भव मयि सदा न्यस्त-भारा धृतास्था॥४६।

सर्वस्वं मे परमवहिता निश्चयं मद् गृहाण
देव्याराध्या त्वमसि हि भजन् श्रद्दधानोऽस्मि दासः ।
प्रीत्याकांक्षी त्वदयनगतस्त्वत्परः केवलं वै
याचेऽहं त्वां मयि तु परमं धेह्यनन्तं प्रसादम् ॥४७॥

ध्येयासि त्वं भुवि च परमा मत्तपोऽपि त्वमेव
त्वां सिद्धिं चेत् समधिकृतवान् स्यामतः पूर्णकामः ।
दासोऽधीनो मननचरितै रीश्वरि प्रार्थयेऽहं
हस्ताभ्यां ते चरणकमले धारयन् मे प्रसीद ॥४८॥

श्रुत्वेत्यस्य प्रियमपि सती दुर्लभं सत्यवाक्यं
संतुष्टा साऽप्यधिकमनुगा हास्यशुभ्रास्यभासा ।
पत्युत्संगं किल धृतवती नोरवा न्यस्तभारा
स्वीकुर्वाणा वरमिव पतिप्रार्थितं कामभोगम् ॥४९॥

भावावेगाप्रतिहृतमतिः स्पन्दहीनेव तन्वी
तं कामार्त्ता प्रियमुखसुधापानमिच्छु श्चुचुम्ब ।
नन्दाधिक्यान्मदनविमुदो वाक्पटुत्वोज्भिताया:
स्वांगीकारः स्फुटयति रतौ नेत्रपातैः स्म लोलैः ॥५०॥

वक्षः-स्फीत्या सुविकचकुचे कोमले धूयमाने
नीवीबन्धच्युतिमपि परिस्रस्तमेवांगवस्त्रम् ।
सोष्णश्वासं लघुगतिमतो देहवल्लीं तुदन्तं
प्रेमावेशावनतनयनाऽऽघाततैक्ष्ण्यञ्च धत्ते ॥५१॥

छन्नश्चापींगितमयवचा विभ्रमोऽस्याः प्रियेऽतो
लज्जाबन्धेऽप्यभवदमितः कामपीडां-गतायाः ।
स्पष्टं नीत्वा नयननिहितां कामिनी-मौन-भाषां
जग्राहेमां प्रणयकुशलां कामचारः स कामी ॥५२॥

रागोद्दीप्तां रतिविधिपटुं प्रेमपूर्णां मनोज्ञां
तां संप्रीतामधिकसुखदां बाहुपाशेन बद्धाम् ।
व्रीडाभूषामथ च सकलं स्वीयमंगं त्वपूर्वं
सम्यक् पत्या उपहृतवतीं मूर्त्तशान्ति स आप ॥५३॥

प्रेमोद्भ्रान्ता पतिहृदिगता दत्तवक्त्रामृताऽस्मिन्
ऐकान्त्येन प्रणयितपतौ सर्वमंगं समर्प्य ।
एकीभूता सममवयवैः कान्तकान्ताप्तकान्तिः
स्वर्स्ति पूर्णामधिमृतवती सार्थकाऽऽसीत् समन्तात् ॥५४॥

बाधोत्तीर्णा द्रुततरगति श्चञ्चला लास्यशीला
सोच्छ्वासोच्चापलितमधुवाक् सागरं संवहन्ती ।
तत्सान्निध्यादधिकमधुरा मन्दवेगा क्रमेण
धीरैवासीत् पतिगततनु र्लब्धसिन्धु र्नदीव ॥५५॥

आत्मानं सा पुनरकृपरणा तुल्यरूपाश्रयं वै
सीमाऽतीतं प्रणयमतुलं यौवनं कामकाम्यम् ।
निःसन्देहा चिरमभिरता चैकचित्ताऽर्घ्यरूपं
शान्ति यान्ती सकलविभवं स्वामिने संनिवेद्य ॥५६॥

इष्टप्राप्तिं ह्युपजिगमिषु र्दत्तसर्वा मृगाक्षी
तत् सर्वस्वं सतनुमतनुञ्चेव तं वित्तरत्नम् ।
ऐश्वर्यं चाऽतनुतनुयुतं प्राणतोषं महार्घं
कान्तं कान्तं चिरमनुगतं रागिणं निश्चिचाय ॥५६॥

किंवा सम्यग् दयितपुरुषे दत्तवत्यां स्वसत्तां
नूनं तस्याममितमधुरः प्रेममूर्त्तिः प्रसन्नः ।
कामार्त्तः सन्नुभयसुखदं रागचर्यं दधौ वै
तोषं प्रापातिशयमुभयो, रिक्तता पूर्णतायै ॥५७॥

सा नारीणां समभिलषिते स्नेहशान्ते प्रशस्ते
पत्युत्संगे प्रणयमधुरे सर्वशंकार्त्तिपारे ।
मज्जन्त्येव प्रियपरगता साथकैवाऽऽबभूव
प्रत्यागच्छेद् ददति सकलं प्रायशः पूर्णलाभः ॥५८॥

रूपद्युत्याऽनिमिषनयने कान्तचित्तं प्रियस्य
प्रेमाक्रान्तं हृदयमयुतैः सद्गुणैः स्वैस्तथा च ।
आत्मानञ्चाऽतुलितवसुना क्रीतवत्याबभूव
शुद्धप्रेम्णा खलु विलसताऽगेन सा सार्थकाद्य ॥६०॥

यस्य स्तुत्या मधुकर इव प्रेमपात्रं प्रकूजेद्
यच्चाकर्षेन्नयनमनसी ह्यात्मशक्तेः प्रियस्य ।
प्रेमावेगः प्रियजनहृदि स्वानुकूलो यतः स्या-
त्तच्चारुत्वं समुदितफलं योषितां वित्तसारः ॥६१॥

येन प्रीति स्त्वनपरगति र्जन्यते स्वप्रिये वै
यद्बद्धेन प्रभुरिव सदा सेव्यते तुष्यते स्त्री ।
यद्वेगात्तं त्वभिनवमतः कामरागं प्रियोऽत्तु
सत्तत् प्रेम प्रणयिलषितं गौरवं हि प्रियायाः ॥६२॥

यस्याः प्रेम प्रियहृदयजिच्चाप्तकामं यथार्थम्
ऐकान्त्येन स्वपतिपरमं या सतीत्वं विधत्ते ।
सर्वस्वं या प्रियमधिपतौ सत्त्वसारं दधाना
सा वै नारी रमणमधुरा शर्मदा स्वामिसेव्या ॥६३॥

वक्षोबन्धे स्खलति च बभौ जातु हेमाद्रियुग्मं
स्निग्धन्त्वन्त-स्थितमधुरसैः कोमलं कृष्णचूड़म् ।
आदर्शं वै नयनसुखदं भूषणं कामिनीनां
रम्यस्पर्शं चिरमविचलं कामदेवस्य पीठम् ।।६४।।

नूनं नेति स्तनयुगमहो किन्तु सच्चित्तहारि
मुक्तिस्फीतं विरहदहनै र्दीप्यमानञ्च कामम् ।
पूर्णाकारं मदनमदिरापात्रमेवापि हैमं
दृष्टौ स्पष्टं मनसि च बभौ काममुग्धप्रियस्य ।।६५।।

एकं चित्तं त्वपरमनसि प्रेमसत्ताश्रयत्वाद्
अङ्गीभूतं सुखमुपगतेऽनन्तरागै र्विलीनम् ।
स्व-प्रत्यंगं भजदिह भृशं चानुरूपं परांगं
देहद्वार-प्रतिहतगति प्राणयुग्मं रुरोद ।।६६।।

भेदं कुर्वन्नुरस उरसि क्षुद्र एवाप्यनिष्टः
चिक्षेपेऽस्याः शिरसि रभसा स्वामिना कण्ठहारः ।
निश्छेदं तन्मिलितमधुना कान्त-कान्तोष्णवक्षः
रत्नश्रेष्ठे सुदृढमुरसि प्रेममय्या बभूव ।।६७।।

आहूयेयं पतिसुखमिता मन्मथेषून् सहस्रं
ज्योत्स्नां स्वच्छामधिकमधुरां स्निग्धरागार्हमिन्दुम् ।
शान्तं वायुं पिकरवमदं सर्वमोदास्पदं च
तत् सर्वं यद् विरहितुदनं कान्तयोगे सिषेवे ॥६८॥

यत्रैवाथानुपमनयना कान्तदेहे निमग्ना
कुर्वन्त्येवं सुखसुमधुरा सार्थका दृष्टिपातम् ।
मन्दं व्यर्थं विगतसमये क्लेशराशेःपदं यत्
सर्वं तच्चाऽप्यभिनवरतेराश्रयं प्राप सद्यः ॥६९॥

अन्योन्यं यत् प्रणयिमिथुनं भावयत् प्रेम दध्रे
तच्चापारं विलसदधुना पूतमूर्ध्वं बभौ वै ।
विच्छेदात्तं प्रणयकुसुमं व्यक्तिकेन्द्रं सकामं
पूर्णोत्फुल्लं प्रियमतिचिरेत् संगमेऽपौरुषेयम् ॥७०॥

मुख्यार्थे वै प्रणयविभवे प्रेमिणो भूरि भुक्ते
सर्वं किञ्चागुणमपि मतं भूयसा प्रीतिकारि ।
संयुक्ताः स्युश्चिरमथ भुवि प्रेमिणो मोदमाना
भद्रं शान्तिः सुखमविहतं सर्वजीवेषु सन्तु ॥७१॥

मिलनोल्लास इत्येव सर्गोऽन्त्यः सुधियां मुदे ।
अलकामिलनञ्चात्र चापलाय समाप्यते ।।
[कालिदासानुदासेन मन्देनापि रसेप्सुना ।
कवित्वलेशहीनेन दर्शनमात्रसेविना ।।
कुर्वता दुष्करं तस्मात् विद्वत्-साधुक्षमार्थिणा ।
उपाह्व-पुरकायस्थ-द्विजेन्द्रलाल-शर्मणा ।।]

मालिन्यमत्र यच्चाप्यं सर्वं तद्दैन्यजं मम ।
भोग्यञ्चेद् रसमाधुर्यं किमप्यस्मिन् सतां हि तत् ।

* इति 'शम्' इति *